रागं: नाट

ताळम्: आदि

मर्द मर्द ममबन्धानि
दुर्दान्तमहादुरितानि

1. चक्रायुधरविशततेजोञ्चित
सक्रोधसहस्र प्रमुखा
विक्रमक्रमा विस्फुलिङ्गकण
नक्रहरण हरिनव्यकराङ्का

2. कलितसुदर्शन कठिनविदारण
कुलिशकोटिभवघोषणा
प्रळयानलसम्भ्रमविभ्रमकर
दळितदैत्यगळरक्तविकीरणा

3. हितकरश्रीवेङ्कटेशप्रयुक्त
सतत पराक्रमजयङ्कर
चतुरोहन्तो शरणं गतोस्मि
इतरान् विभज्य इहमां रक्ष